# Shri Shivavibhakti Stotram

# શ્રીશિવવિભક્તિસ્તોત્રમ્

## Document Information

Text title : Shivavibhakti Stotram

File name : shivavibhaktistotram.itx

Category : shiva, ApaTIkara

Location : doc_shiva

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

Shri Shivavibhakti Stotram

# શ્રીશિવવિભક્તિસ્તોત્રમ્

(સ્રગ્વિણી)
અવ્યયઃ સ્વસ્તિદઃ શઙ્કરઃ પાતુ માં
 ઈશ્વરસ્ત્ર્યમ્બકઃ સિદ્ધિદઃ પાતુ મામ્ ।
ઊર્ધ્વરેતાઃ શિવો ધૂર્જટિઃ પાતુ માં
 ભાસ્વરો ભૈરવો મુક્તિદઃ પાતુ મામ્ ॥ ૧॥

અષ્ટમૂર્તિ શિવં વિશ્વનાથં હરં
 ભૂતનાથં ભવં વૈદ્યનાથં મૃડમ્ ।
દક્ષ-જામાતરં યજ્ઞવિધ્વંસકં
 ભાલનેત્રં સદા સાદરં નૌમ્યહમ્ ॥ ૨॥

યોગિના નિર્મિતં વિશ્વમેતત્ પુરા
 શમ્ભુના રક્ષિતં વિશ્વમેતત્ સદા ।
શૂલિના નાશિતા આપદઃ પ્રાણિનાં
 સૌખ્યદં તં શિવં પ્રાગ્જલિઃ સ્તૌમ્યહમ્ ॥ ૩॥

શમ્ભવે સ્થાણવે ભિક્ષવે યોગિને
 શૂલિને ધન્વિને દૈત્યહન્ત્રે નમઃ ।
વિશ્વકર્ત્રે નમો વિશ્વધર્ત્રે નમો
 વિશ્વસંહારિણે ભક્તપાત્રે નમઃ ॥ ૪॥

વહ્નિનેત્રાત્તથા સર્વભૂતાત્મનો
 નીલકણ્ઠાત્તથા શૈલજાવલ્લભાત્ ।
વામદેવાત્તથા દક્ષયજ્ઞાન્તકાદ્
 વ્યોમકેશાત્પરં દૈવતં નાપરમ્ ॥ ૫॥

યજ્ઞસંહારિણઃ શૂલિનઃ શ◌ૃઙ્ગિણો
 જાહ્નવીધારિણો ધન્વિનો ધૂર્જટેઃ ।
અષ્ટમૂર્તેસ્તથા ભાનુકોટિદ્યુતેઃ

પાદપદ્મં સદા ધ્યાયતે યોગિભિઃ ॥ ૬॥

ઈશ્વરે શઙ્કરે પાર્વતીવલ્લભે
ત્ર્યમ્બકે ધૂર્જટૌ સર્વભૂતાધિપે ।
ચન્દ્રચૂડે તથા વ્યાઘ્રચર્માવૃતે
વિશ્વનાથે મનઃ સર્વદા લીયતામ્ ॥ ૭॥

શૂલપાણે વિભો વિશ્વનાથ પ્રભો
ભસ્મમન્દાકિનીભૂષિતાઙ્ગ પ્રભો ।
અષ્ટમૂર્તે વિભો મુણ્ડમાલ પ્રભો
ચન્દ્રમૌલે વિભો ધુર્જટે પાહિ મામ્ ॥ ૮॥

વિભક્તિરૂપસ્ય સદાશિવસ્ય
સ્તોત્રં સુરમ્યં મનુજઃ પઠિત્વા ।
અનન્યચિત્તેન પ્રતિપ્રભાતં
કલ્યાણમાપ્નોતુ શિવપ્રસાદાત્ ॥ ૯॥

ઇતિ શ્રી આપટીકરવિરચિતં શ્રીશિવવિભક્તિસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Shri Shivavibhakti Stotram*

pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*